# वेदान्तसिद्धान्तदिशा इन्द्रियाणां देवताधिष्ठातृत्वविचारः – एका ब्रह्मसूत्रानुसारिणी समीक्षा

**Debjyoti Kundu**
Assistant Professor (Guest), Dept. of Sanskrit,
Nava Nalanda Mahavihara (Deemed University),
Ministry of Culture, Govt. of India, Nalanda, Bihar, India.
Email: debjyotikundu26@gmail.com

Abstract: भगवता बादरायणव्यासेन ब्रह्मसूत्रं विरचितम्। वेदान्तशास्त्रस्य प्रमुखग्रन्थत्वेन ब्रह्मसूत्रं परिचयं लभते। ब्रह्मसूत्रैः अद्वैतवेदान्तशास्त्रस्य मतानि श्रुतियुक्त्यादिभिः सम्यक् सन्ति प्रतिपादितानि। पूर्वपक्षिणां विविधशङ्कानिवारणपुरःसरं भगवता शङ्कराचार्येणापि ब्रह्मसूत्रोपरि रचितभाष्येण वेदान्तमतं सुदृढीकृतम्। वस्तुतः सूत्रैरेतैः ब्रह्मस्वरूपं प्रतिपादितम्। सांख्यादयः पूर्वपक्षिणः ब्रह्म नाङ्गीकुर्वन्ति। अतस्तेषां नये ब्रह्मणः जगत्कारणत्वं न कथमपि सिध्यति। अत एव भगवान् श्रीशङ्कराचार्यः तद्रचितभाष्येण तेषां मतानि खण्डयित्वा श्रुतिप्रमाणैः वेदान्तमतानि अलङ्कृत्य प्रतिष्ठापयामास। एवं ब्रह्मसूत्रे पूर्वपक्षिणां पुनः पुनः शङ्कानिरवारणपुरःसरं श्रुतियुक्त्यादिभिः सिद्धान्तिमतानुसारं ब्रह्मणः जगत्कारणत्वं सम्यक् प्रतिपादितम्।

ब्रह्मसूत्रस्य द्वितीयाध्यायस्य चतुर्थपादस्य सप्तममधिकरणमस्ति ज्योतिराद्यधिकरणमिति। अत्र सूत्रत्रयं विद्यते। इन्द्रियाणि देवताभिः प्रेरितानि भूत्वा एव विषयं प्रति गच्छन्ति इति प्रतिपादनमत्र दृश्यते। तत्र जीवात्मा एव भोक्ता भवति, न तु देवता। एष एव विषयः शङ्कासमाधानपुरःसरं भाष्यकारेण प्रतिपादितमस्ति। द्वितीयाध्यायस्य तृतीयपादे भूतभोक्तृश्रुतिविरोधः परिहृतः। चतुर्थपादे कर्तुः जीवस्य उपकरणानाम् इन्द्रियाणाम् उत्पत्तिरस्ति वा न वेति विचारोऽस्ति। एवं ज्योतिराद्यधिकरणे प्राणानां देवताधिष्ठितत्वं प्रतिपाद्यते। इन्द्रियाणि विषयदेशं प्रति तु गच्छन्ति, परन्तु तत्र काचित् प्रक्रियाऽपि वेदान्तशास्त्रे विराजते। को हि विषयं प्रति इन्द्रियाणि प्रेरयति देवो वा जीवो वेत्यस्मिन् विषये विद्वत्सम्प्रदाये विशिष्टो विचारो भवति। पूर्वपक्षिणस्तु जीवानामेव प्रेरकत्वं साधयितुं प्रवर्तन्ते। परन्तु देवानामेव तदधिष्ठातृत्वात् तत्प्रेरकत्वं भवतीति सिद्धान्तः। एतेषामेव तत्त्वानां प्रतिपादनं शोधपत्रेऽस्मिन् विस्तरेण कृतं विद्यते। अत्र विविधानाम् इन्द्रियाणां कार्याणि, तेषामधिष्ठातृदेवताः, विषयान् प्रति इन्द्रियाणां गमनप्रक्रिया, तथा च तेषां प्रेरकत्वविषये च चर्चाः विराजन्ते। वेदान्तसिद्धान्तानुसारम् इन्द्रियविषयकविचारान् प्रतिपाद्य ब्रह्मसूत्रस्थस्य ज्योतिराद्यधिकरणस्थविचाराः उपस्थापिताः।

Keywords: वेदान्तः, ब्रह्मसूत्रम्, शाङ्करभाष्यम्, इन्द्रियाणि, देवताः, जीवः, भोक्ता, विषयाः।

### उपोद्घातः

वयं सर्वेऽपि इन्द्रियाणां विषये सम्यग् जानीमः। इन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेति भेदेन द्विधा विभज्यन्ते। तत्र केचन अन्तःकरणमपि सम्मेलयन्ति। तत्रापि पुनः अन्तःकरणस्य विविधता शास्त्रेषु दृश्यते। विद्वत्सम्प्रदाये इन्द्रियाणि कथं विषयान् प्रति गच्छन्ति इत्यस्मिन् विषये बहुधा चर्चा भवति। तद्विचारकाले एव तेषाम् अधिष्ठातृदेवताविषये चर्चा समागच्छति। इन्द्रियाणां विविधाः अधिष्ठातृदेवताः भवन्ति। ताः देवता एव इन्द्रियाणि प्रेरयन्ति, न तु जीवः स्वयम्। अत्र जीव एव प्रेरयतीति भ्रमो भवितुर्महति। पूर्वपक्षिणस्तु तथैव साधयन्ति, किन्तु सिद्धान्तानुसारम् इन्द्रियाणामेव प्रेरकत्वं भवति। ब्रह्मसूत्रे द्वितीयाध्यायस्य चतुर्थपादे ज्योतिराद्यधिकरणं विराजते। तत्र अस्मिन् विषये बादरायणव्यासेन

सूत्रं विरचितम्। श्रीमान् शङ्कराचार्यः तेषां सूत्राणां सुष्ठु व्याख्यानमप्यकरोत्। इन्द्रियाणि देवताधिष्ठिताः भूत्वा एव स्वस्वकार्याय प्रवर्तन्ते, किञ्च जीवात्मन एव भोक्तृत्वं सम्भवति, न तु देवतानामिति तत्र प्रतिपाद्यते। प्रस्तुते शोधप्रबन्धे विविधानाम् इन्द्रियविषये परिचयपुरःसरं तेषां विषयदेशं प्रति गमनप्रक्रिया उक्ता, तथा च ज्योतिराद्यधिकरणानुसारं तत्तदधिष्ठातृदेवतानां विषयेऽपि पूर्वोत्तरपक्षाभ्यां प्रश्नप्रतिवचनकौशलेन तत्त्वानि प्रतिपादितानि।

**विविधानि इन्द्रियाणि**

वयं साधारणतया विविधानाम् इन्द्रियाणां विषये जानीमः। लौकिकावस्थायां यथा वयम् इन्द्रियाणां प्रयोगं तत्तत्कार्यमवगच्छामः, शास्त्रेष्वपि तथैव विविधानाम् इन्द्रियाणां तथाविधानामेव कार्याणां विस्तृततया उल्लेखः प्राप्यते। प्रधानतया इन्द्रियाणां ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेति विभागद्वयं भवति। तत्रापि केचन अन्तःकरणम् इन्द्रियकोटौ अन्तर्भावयन्ति। यतो हि तस्यापि ज्ञानेन्द्रियेभ्यः कर्मेन्द्रियेभ्यश्च भिन्नं कार्यं भवति। तत्र पुनः अन्तःकरणं बहुधा भवितुमर्हतीति शास्त्रेषु दृश्यते। अधः तालिकया इन्द्रियाणां विषये प्रस्तूयते—

| समूहनाम | इन्द्रियाणि |
|---|---|
| **ज्ञानेन्द्रियाणि** | श्रोत्रम्, त्वक्, चक्षुः, जिह्वा, नासिका |
| **कर्मेन्द्रियाणि** | वाक्, पाणिः, पादः, पायुः, उपस्थः |
| **अन्तःकरणम्** | मनः, बुद्धिः, चित्तम्, अहङ्कारः |

अत्र अन्तःकरणविषये विप्रतिपत्तयः भवन्ति। केचन अन्तःकरणमेकमेवेति अङ्गीकुर्वन्ति। केचन केवलं मनः बुद्धिश्चेति अन्तःकरणं द्विविधमिति वदन्ति। केचन च तयोरेव चित्ताहङ्कारयोरन्तर्भावं कारयन्ति। शास्त्रेषु विविधप्रकारैः इन्द्रियाणां विश्लेषणं कृतमस्ति। यथा–

"इन्द्रियाणि हयान्याहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥"[1] इति।

अर्थात् मनीषिणः इन्द्रियाणि अश्वरूपेण प्रतिपादितवन्तः। तथा च तेषां विषयाः रूपरसगन्धस्पर्शशब्दाः अश्वस्य मार्गरूपेण उक्ताः। आत्मा, इन्द्रियाणि, मनः इति सर्वमाहत्य भोक्ता भवति। श्रीमद्भगवद्गीतायामपि "इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते"[2] इत्यादिप्रसङ्गैः इन्द्रियाणां विषये बहुधा चर्चा विधीयते।

**इन्द्रियाणां तत्तदधिष्ठातृदेवताः**

सर्वेऽपि वयं तेषामिन्द्रियाणां कार्यविषये जानीमः, परन्तु तेषां देवताविषये विद्वत्सम्प्रदाये विशिष्टविचाराः दृश्यन्ते। श्रीसदानन्दयोगीन्द्रः विश्ववैश्वानरयोः वर्णनसमये सर्वेषामपि इन्द्रियाणाम् अधिष्ठातृदेवताः, तथा च तेषां कार्यविषये सम्यक् प्रतिपादितवान्। तथाह्युक्तं – "तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरेन्द्रियचतुष्केण क्रमात्सङ्कल्पनिश्चयाहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतः"[3] इति। अधः तालिकया एतद् विशदीक्रियते—

| समूहनाम | इन्द्रियाणि | देवताः | कार्याणि |
|---|---|---|---|
| ज्ञानेन्द्रियाणि | श्रोत्रम् | दिक् | श्रवणम् |
| | त्वक् | वायुः | स्पर्शनम् |
| | चक्षुः | आदित्यः | दर्शनम् |
| | जिह्वा | वरुणः | रसास्वादनम् |
| | नासिका | अश्विनीकुमारौ | घ्राणम् |
| कर्मेन्द्रियाणि | वाक् | अग्निः | वचनम् |
| | पाणिः | इन्द्रः | आदानम् |
| | पादः | उपेन्द्रः | गमनम् |
| | पायुः | यमः | विसर्गः (त्यागः) |
| | उपस्थः | प्रजापतिः | आनन्दः |
| अन्तःकरणम् | मनः | चन्द्रः | सङ्कल्प-विकल्पौ |
| | बुद्धिः | चतुर्मुखः | निश्चयः |
| | अहङ्कारः | शङ्करः | गर्वः (अहम् अहमिति) |
| | चित्तम् | अच्युतः | अनुसन्धानं सुखदुःखादिबोधश्च |

एवमत्र सर्वेषामपि इन्द्रियाणां भिन्नभिन्नाधिष्ठातृदेवताः तथा कार्याणि भवन्तीति अवगन्तव्यम्।

**विषयदेशं प्रति इन्द्रियाणां गमनप्रक्रिया**

इन्द्रियाणि तु विषयान् प्रति गच्छन्ति। परन्तु तत्र गमनप्रक्रिया कीदृशी इत्यस्मिन् विषये सम्यग् विचारो विराजते वेदान्तसिद्धान्ते। अस्मिन् प्रसङ्गे वर्णनसमये चैतन्यभेदचर्चा आगच्छति शास्त्रे। चैतन्यं हि विषयचैतन्यं, प्रमाणचैतन्यं, प्रमातृचैतन्यमिति भेदेन त्रिविधम्। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यमुच्यते, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यमुच्यते, अन्तःकरणावच्छिन्नं चैतन्यं च प्रमातृचैतन्यमुच्यते। प्रमातृचैतन्यं प्रमाणचैतन्येन विषयचैतन्यं प्रति गच्छति। तत्र विषयेन सह प्रमातृचैतन्यस्य एकता भवति। तया प्रक्रियया तदैक्यकारणात् द्वयोः चैतन्ययोरभेदो जायते। स अभेद एव ज्ञानकारणम्। तथा हि उदाह्रियते धर्मराजाध्वरीन्द्रेण— यथा “तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वादिषयाकारेण परिणमते”[4] इति।

एवमेव अयं घटः इति प्रत्यक्षस्थले अवगन्तव्यः। घटोऽत्र विषयः। तदवच्छिन्नं चैतन्यं विषयचैतन्यम्। तत् प्रति प्रमातृचैतन्यं प्रमाणचैतन्येन गच्छति। ततः प्रमातृचैतन्येन सह घटावच्छिन्नचैतन्यस्य ऐक्यं जायते। तस्माद् अभेदादेव घटस्य प्रत्यक्षं जायते। तथाह्युक्तं– “अयं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात् तदुभयावच्छिन्नं चैतन्यमेकमेव, विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाऽजनकत्वात्। अत एव मठान्तर्वर्ति-

घटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते"[5] इति। अपि चोच्यते– "अयं घट इति घटप्रत्यक्षस्थले घटाकारवृत्तेः संयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम्"[6] इति।

**इन्द्रियाणां देवताधिष्ठितत्वविचारः**

प्राणाः किं स्वमहिम्ना एव स्वस्मै स्वस्मै कार्याय प्रभवन्ति, आहोस्वित् देवताधिष्ठिताः प्रभवन्ति इति विद्वत्सम्प्रदाये विचारो जायते। तत्र स्वस्वकार्यसम्पादनशक्तियोगात् स्वमहिम्ना एव प्राणाः स्वकार्यसम्पादने स्वविषयान् प्रति इन्द्रियाणि प्रवर्तेरन् इति पूर्वपक्षी कथयति। किञ्च यदि देवताधिष्ठिताः एव प्राणाः भवन्ति, तर्हि अधिष्ठातॄणां देवतानां भोक्तृत्वप्रसङ्गो भवति। तेन च शारीरस्य जीवस्य भोक्तृत्वं न भवति। अतः स्वमहिम्ना एव प्राणानां प्रवृत्तिर्भवतीति पूर्वपक्षिमतम्।

एवं पूर्वपक्षे प्राप्ते उच्यते– "ज्योतिराद्यधिष्ठानं तु तदामननात्"[7] इति। अत्र तु इति शब्देन पूर्वपक्षः व्यावर्तते। ज्योतिरादिभिः अर्थात् अग्न्यादिषु अभिमानीनिभिः देवताभिः प्रेरितानि भूत्वा वागादीनि इन्द्रियाणि स्वस्वकार्येषु प्रवृत्तानि भवन्ति। अत्र हेतुमाह – 'तदामननात्' इति। तथा हि आमनन्ति– "अग्निः वाग् भूत्वा मुखं प्राविशत्"[8] इति। किन्तु अत्र उक्तवाक्यात् अग्न्यादेः इन्द्रियभाव एवावगम्यते, न तु अधिष्ठातृत्वमिति संशयो भवितुमर्हति। तस्मात् अग्नेरयं वाग्भावः मुखप्रवेशश्च देवतात्मना अधिष्ठातृत्वमङ्गीकृत्य उच्यते। दाहादिसम्भावनातः दूरस्थताकारणाच्च अग्न्यादीनां मुखादिषु प्रवेशः न सम्भवति, किञ्च चेतनस्य देवतात्मनः अचेतनेन्द्रियभावोऽपि न सम्भवति। अचेतनाग्न्यादिकम् अचेतनवागादिरूपेण मुखादिषु प्रविष्टमतः अचेतनाग्न्यादिकम् अचेतनवागाद्युपादानमिति उक्तश्रुतेः तात्पर्यमस्तु। अस्य उत्तरमुच्यते– देवतानां प्रेरकत्वरूपसम्बन्धं व्यतिरिच्य अग्नेः वाचि मुखे वा कश्चित् विशेषसम्बन्धो न दृश्यते। यदि तदभविष्यत्, तर्हि वागिन्द्रियेऽपि दाहकत्वं दृश्येत। एवमन्यत्रापि बोध्यव्यम्। किन्तु तन्न भवति। अतोऽत्र उपादानोपादेयभावो नास्ति, किन्तु अधिष्ठानाधिष्ठेयभावोऽस्तीति अवगम्यते। तथा "वायुः प्राणो भूत्वा नासिके प्राविशत्"[9] इत्येवमाद्यापि योजयितव्यम्। अन्यत्रापि "वागेव ब्रह्मणः चतुर्थः पादः, सोऽग्निना ज्योतिषा भाति च तपति च"[10] इत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्वादावचनेन एतमेवार्थं द्रढयति। अग्न्यादिकं वागादीन्द्रियाणामेव अधिष्ठातृदेवताः इति श्रुतिः प्रतिपादयति। वागादीनामग्न्यादिभावापत्तिवचनमपि एतमेवार्थं द्योतयति– "स वै वाचमेव प्रथमाम् अत्यवहत्, सा यदा मृत्युमत्यमुच्यते सोऽग्निरभवत्"[11] इति। सर्वत्र अध्यात्माधिदैवतविभागेन वागादीनाम् अग्न्यादिरूपेण वर्णनम् अनेनैव प्रेर्यप्रेरकभावरूपसम्बन्धेनैव भवति। स्मृतौ अपि वागादीन्द्रियाणि अग्न्यादिदेवताशष्ठितानि इति सप्रपञ्चं दर्शितम्–

"वागध्यात्ममिति प्राहुर्ब्रह्मणास्तत्त्वदर्शिनः।
वक्तव्यमधिभूतं तु वह्निस्तत्राधिदैवतम्॥"[12] इति।

स्वकार्यशक्तियोगात् स्वमहिम्ना एव प्राणाः प्रवर्तन्ते इति पूर्वपक्षिवचनमयुक्तम्। शकटदृष्टातेन एतत्परिहरति सिद्धान्ती। शकटाः गमने शक्ताः भवन्ति चेदपि अनडुहाद्यधिखष्ठिता एव प्रवर्तन्ते इति। किन्तु दुग्धस्य दधिभावस्तु चेतनप्रेरितो न भवति, तर्हि अचेतनं चेतनप्रेरितं कथं भवेदिति शङ्कायामुच्यते– उभयथा उपपत्तौ च आगमबलेन अचेतनानामिन्द्रियाणां प्रेरकाः चेतनाः देवता एव भवन्ति इति निश्चीयते। एवमत्र इन्द्रियाणां देवताधिष्ठितत्वमेव प्रतिपाद्यते।

**जीवानामेव भोग्यत्वं, न तु देवतानाम्**

अधिष्ठातॄणां देवतानामेव भोक्तृत्वप्रसङ्गः न शारीरस्य इति पूर्वपक्षिभिः उक्तमासीत्। तन्निराकरणाय सूत्रमुच्यते– "प्राणवता शब्दात्"[13] इति। प्राणानाम् अधिष्ठातृदेवताः सन्ति, ताभिरेव इन्द्रियाणि प्रेरितानि भवन्ति। किन्तु तथापि कार्यकरणसंघातस्वामी शारीर एव भोक्ता भवति यतो हि अनेनैव प्राणानां भोक्तृभोग्यभावसम्बन्धोऽवगम्यते। तथाहि श्रुतिः– "अथ यत्र एतदाकाशमनुविषण्णं चक्षुः सः चाक्षुषः पुरुषः दर्शनाय चक्षुः, अथ यो वेद इदं जिघ्राति इति स आत्मा गन्धाय घ्राणम्"[14] इति। जीवेन सहैव प्राणानां सम्बन्धोऽत्र श्रूयते। अत एव जीव एव भोक्ता, न तु देवताः। करणानि च अनेकानि। प्रतिकरणम् अधिष्ठात्री देवतापि भवति। अत एव एकस्मिन्नेव शरीरे तासां सर्वेषामपि देवतानां भोक्तृत्वं न सम्भवति। योऽहं पूर्वमद्राक्षं, सोऽहमिदानीं श्रृणोमि इत्येवं प्रत्यभिज्ञासम्भवात् अस्मिन् शरीरे शरीरस्वामी भोक्ता एक एव इत्यवगम्यते। यदि अत्र अनेके भोक्तारः स्युस्तर्हि, प्रत्यभिज्ञा न सम्भवेत। अत एव प्राणाधिष्ठातृदेवताः न भोक्तारः, अपि च शारीरः जीवात्मा एव भोक्ता इत्यवगम्यते।

**शरीरे देवानां भोक्तृत्वाभावत्वनिरूपणम्**

कदाचित् देवतानामत्र भोक्तृत्वं, कदाचित् च जीवस्येति अनिमयोऽस्तु इति चेत्, तत्राह सूत्रकारः– "तस्य च नित्यत्वात्"[15] इति। शारीरस्य जीवस्य अस्मिन् शरीरे भोक्तृत्वेन नित्यत्वमङ्गीकरणीयम्। यावत् मोक्षो न भवति, तावत् स्वकर्मार्जितभोक्तृत्वं जीवात्मन उपपद्यते। किञ्च सुखदुःखोपभोगोऽपि जीवात्मन एव भवति। एतत्तु देवतानां न सम्भवति। देवताः तु परस्मिन् ऐश्वर्ये पदे अवतिष्ठमानाः भवन्ति। अत एव ता अस्मिन् हीनशरीरे भोक्तृत्वं प्रतिलब्धुं नार्हन्ति। श्रुतिश्च भवति– "पुण्यमेवामुं गच्छति, न ह वै देवान् पापं गच्छति"[16] इति। अत एव देवतानां भोक्तृत्वं न कथमपि सिध्यति।

जीवेन सहैव प्राणानां मोक्षप्राप्तिपर्यन्तं नित्यसम्बन्धोऽवगन्तव्यः। जीवस्य उत्क्रमणे सत्येव मुख्यप्राणस्य प्राणानां च उत्क्रमणं भवति। तथाहि श्रुतिः– "तमुत्क्रामन्तं प्राणोऽनुत्क्रामति, प्राणमनुत्क्रामन्तं सर्वे प्राणा अनुत्क्रामन्ति"[17] इति। तस्मात् जीव एव प्राणानामधिपतिः। देवता रथसारथिः तेषां प्रेरयिता भवति। अत एव सारथिरिव प्राणानां नियन्त्रणकारिणां देवतानां वर्तमानेऽपि रथस्वामिस्थानीयस्य जीवस्य भोक्तृत्वं नापगतं भवति। किमर्थं तदुच्यते– देवता करणकोटौ अन्तर्भवति, न तु भोक्तृपक्षे इति। तस्मादेव देवता कारयति, न तु भुङ्क्ते इत्युच्यते। अत एव जीवस्य मोक्षकालपर्यन्तस्थायित्वात् न देवानामस्मिन् शरीरे भोक्तृत्वम्। अत एव देवानां प्राणाधिष्ठातृत्वे न किञ्चिद् बाधकं भवति।

**उपसंहारः**

मोक्षः परमपुरुषार्थः। तत्सिद्धये एव वेदान्ता आरब्धाः। ब्रह्मसूत्रैः ब्रह्मस्वरूपं सम्यक् प्रतिपादितम्। तत्र श्रीशङ्कराचार्यः स्वरचितभाष्येण वेदान्तमतानि श्रुतियुक्त्यादिभिः सम्यगलङ्कृत्य प्रतिष्ठापयामास। ब्रह्मस्वरूपनिरूपणकाले ब्रह्मण एव सर्वं जातमिति ब्रह्मसूत्रे प्रतिपादितमस्ति। अतः सर्वमेव ब्रह्मणः कार्यमित्युच्यते। किन्तु एतन्न स्वीकुर्वन्ति पूर्वपक्षिणः। ते बहुधा प्रमाणपुरःसरं तत् खण्डयन्ति। किन्तु तेषां मतानि खण्डयित्वा अद्वैतवेदान्तमतमेव दृढतया प्रतिष्ठापितवान् भाष्यकारः श्रीशङ्कराचार्यः। ब्रह्मसूत्रस्य द्वितीयाध्यायस्य तृतीयपादे वियदादिविषयः श्रुतिविप्रतिषेधः परिहृतः। चतुर्थपादे तु प्राणविषयः परिह्रियते। तत्र सप्तममधिकरणमस्ति ज्योतिराद्यधिकरणमिति। इन्द्रियाणि देवताभिरेव प्रेरितानि भवन्ति, जीवस्य एव भोक्तृत्वं भवति, न तु देवतानामिति एतदधिकरणप्रतिपाद्यविषयः। तत्र 'ज्योतिराद्यधिष्ठानं तु

तदामननात्' इति सूत्रेण इन्द्रियाणां देवताधिष्ठितत्वं प्रतिपाद्यते। द्वितीयेन 'प्राणवता शब्दात्' इति सूत्रेण देवतानां भोक्तृत्वप्रसङ्गः निराक्रियते। पुनरपि तद् द्रढयति 'तस्य च नित्यत्वात्' इति तृतीयसूत्रेण। एवमत्र प्रस्तुते शोधप्रबन्धे वेदान्तसिद्धान्तानुसारम् इन्द्रियविषयिणी चर्चा ब्रह्मसूत्रानुसारं निरूपिता इति शम्।

## Endnotes

1. कठोपनिषद् (१.३.४)
2. श्रीमद्भगवद्गीता (३.४०)
3. ब्रह्मसूत्रम् (२.४.१४)
4. वेदान्तसारः
5. वेदान्तपरिभाषा (प्रत्यक्षपरिच्छेदः)
6. वेदान्तपरिभाषा (प्रत्यक्षपरिच्छेदः)
7. ब्रह्मसूत्रम् (२.४.१४)
8. ऐतरेयोपनिषद् (१.२.४)
9. ऐतरेयोपनिषद् (१.२.४)
10. छान्दोग्योपनिषद् (३.१८.३)
11. बृहदारण्यकोपनिषद् (१.३.१२)
12. स्मृतिः
13. ब्रह्मसूत्रम् (२.४.१५)
14. छान्दोग्योपनिषद् (८.१२.४)
15. ब्रह्मसूत्रम् (२.४.१६)
16. बृहदारण्यकोपनिषद् (१.५.२०)
17. बृहदारण्यकोपनिषद् (४.४.२)

## Bibliography


- मुसलगांवकर, श्रीगजानन शास्त्री। (व्याख्याकारः)। श्रीरामशास्त्री मुसलगांवकर। (सम्पादकः)। वेदान्तपरिभाषा। चौखम्बा विद्याभवन। वाराणसी। २०१५ )पुनर्मुद्रित संस्करण)।
- शास्त्री, पञ्चानन-भट्टाचार्यः। (सम्पादकः)। वेदान्तपरिभाषा) श्रीपञ्चानन-भट्टाचार्य-शास्त्रिणा विरचितया परिभाषासंग्रहाख्यया व्याख्यया सहिता)। चौखम्बा-विद्याभवनम्। वाराणसी।
- बृहदारण्यकोपनिषद् (सानुवाद शाङ्करभाष्यसहित)। गीताप्रेस। गोरखपुर।
- ईशादि नौ उपनिषद् (शाङ्करभाष्यार्थ)। गीताप्रेस। गोरखपुर।
- सर्वज्ञभूषण। भारतीयदर्शनसार। संस्कृतगङ्गा। दारागञ्ज, प्रयाग। २१ जून, २०२१ )द्वितीय संस्करण)। जनवरी २०१९ )प्रथम संस्करण)।
- अमृतानन्दः, स्वामी (अनुवादकः, टीकाकारः)। वेदान्तसारः। उद्बोधन-कार्यालयः। कोलकाता। सितम्बर २०१३ (त्रयोदशतमं पुनर्मुद्रणम्)। फरवरी १९९८ (प्रथमं संस्करणम्)।
- विश्वरूपानन्दः, स्वामी (अनुवादकः, व्याख्याकारः)। वेदान्तदर्शनम् (२ अध्यायः)। उद्बोधन-कार्यालयः। कोलकाता। फेब्ररि २०२० (दशमं पुनर्मुद्रणम्)। मार्च् १९८९ (द्वितीयं संस्करणम्)।
- दाहालः, आचार्यः लोकमणिः। संस्कृतसाहित्येतिहासः। चौखम्बा कृष्णदास अकादेमी। वाराणसी। २०१६।
- पंडा, गंगाधर (प्रकाशक)। संस्कृत वाङ्मय का बृहद् इतिहास। उत्तर प्रदेश संस्कृत संस्थान। लखनऊ।
- दीपक कुमार, सञ्जय दत्त भट्ट (लेखक)। संस्कृतप्रतिस्पर्धाप्रकाश। चौखम्बा सुरभारती प्रकाशन। वाराणसी।
- भट्टः, नागराजः। स्वामि-वेदतत्त्वानन्दः। (सम्पादकौ)। भारतीयदर्शनम्। (१ भागः)। राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्। नोएडा। २०१७ (प्रथमं संस्करणम्)।
- Advaita Sharada (https://advaitasharada.sringeri.net/)


——